सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना ।
सा च कृष्णे तिरोभूता सृष्टिसंहारकारके ।
आविर्भूता सृष्टिकाले सा च नित्या यथेश्वरः ।
कुलालश्च घटं कर्त्तुं यथाशक्तो मृदं विना ।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥
सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वागधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ।
मायया सृष्टिकाले च तद्विना न भवेद्भवः ॥
सृष्टिश्च प्रतिबिम्बे च ब्रह्मन् ! ब्रह्मोद्भवा सदा ।
पाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४० अः ॥

मूलफलदः, पुं, ( मूले च फलं ददातीति । दा+कः । ) पनसवृक्षः । इति राजनिर्घण्टः ॥ ( पनसशब्देऽस्य विषयो ज्ञातव्यः ॥ )

मूलभद्रः, पुं, (मूलश्चासौ भद्रश्चेति ।) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलरसः, पुं, ( मूले रसोऽस्याः । ) मोरटलता । इति रत्नमाला ॥

मूलशाकटः, त्रि, (मूलानां भवनं क्षेत्रम् । मूल+"भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ।" ५ । २ । २९ । इत्यत्र वार्त्तिकबलात् शाकटः ।) मूलक्षेत्रम् । क्षेत्रवाच्ये शाकटप्रत्ययेन निष्पन्नम् ॥

मूलशाकिनः, त्रि, ( मूल+शाकिनः । ) क्षेत्रवाच्ये शाकिनप्रत्ययेन निष्पन्नम् ॥

मूला, स्त्री, ( मूलानि बहुलानि सन्त्यस्याः । मूल+अर्श आदित्वादच् टाप् । ) शतावरी । इति राजनिर्घण्टः ॥ मूलनक्षत्रम् । इति शब्दरत्नावली ॥ ( यथा, काशीनाथविरचिते इन्द्रजाले १ अध्यायः ।
"द्वितीयां षष्ठीमष्टम्यां कारयेत् शान्तिकर्म च ।
अश्विनीमृगमूलाश्च पुष्या पुनर्वसुस्तथा ॥")

मूलाधारः, पुं, ( मूलानामाधारः । मूलं प्रधानं आधार इति वा । ) गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम् । स तु शरीरस्थचक्रनाडीनां मूलस्थानम् । अत्र व श ष स साचरयुक्तस्वर्णवर्णचतुर्द्दलपद्ममस्ति । तन्मध्ये इच्छाज्ञानक्रियास्वरूपत्रिकोणं वर्त्तते । तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भुलिङ्गमस्ति । अत्र पृथिवी वर्त्तते । तत्रैव मृणालसूत्रवत् सूक्ष्मसार्द्धत्रिवलयाकारस्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभकुलकुण्डलिनी वर्त्तते । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तद्वाह्ये हेमवर्णाभं व स वर्णचतुर्द्दलम् ॥"
इति तन्त्रसारः ॥

"अथाधारपद्मं सुषुम्नास्यलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥
अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि शूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम् ॥

वज्राख्या वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत्त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥
तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपः प्रकारः ॥
तस्योर्द्ध्वे बिसतन्तुसोदरलसत् सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं संछादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामाला विलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥"
इति श्रीतत्त्वचिन्तामणौ षट्चक्रभेदः ॥*॥

तत्रस्थतीर्थानि यथा, रुद्रयामले ।
"इडा मलस्थाननिवासिनी वा
सूर्य्यात्मिका या यमुनाप्रवाहिका ।
तथा सुषुम्ना मलदेशगामिनी
सरस्वती रचति मज्जनात्मकम् ॥
मनोगतस्नानपरो मनुष्यो
मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।
महीस्थतीर्थे विमले जले सदा,
मूलाम्बुजे स्नाति सुमुक्तिभाग्भवेत् ॥
सर्व्वाणि तीर्थे सुरतीर्थपावनी
गङ्गा महासत्त्वविनिर्गता सती ।
करोति पापक्षयमेव मुक्तिं
ददाति साक्षादमलार्थपुण्यदा ॥"

मूलाह्वं, क्ली, ( मूलमाह्वा आख्या यस्य । ) मूलकम् । इति राजनिर्घण्टः ॥

मूली, [न्] पुं, (मूलमस्यास्तीति । मूल+इनिः ।) वृक्षः । इति शब्दचन्द्रिका ॥ (स्त्रियां ङीप् । ओषधिः । यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
"चक्रकामोषधिं विद्याज्जरामृत्युनिवारिणीम् ।
मूलिनीं पञ्चभिः पत्रैः सुरक्तांशुककोमलैः ॥")

मूली, स्त्री (मूल+गौरादित्वात् ङीष् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ ( नदीभेदः । यथा, मात्स्ये । ११४ । ३१ ।
"ताम्रपर्णी तथा मूली शरवा विमला तथा ॥")

मूलेरः, पुं, ( मूलतीति । मूल+"मूलेरादयः ।" उणा॰ १ । ६२ । इत्येरक् । जटा । इत्युणादिकोषः ॥ राजा । इत्युज्ज्वलदत्तः ।)

मूल्यं, क्ली, ( मूलेन आनाम्यते अभिभूयते मूलेन-समं वा इति । मूल+"नौवयोधर्म्मेत्यादिना ।" ४ । ४ । ९१ । इति यत् । ) पटादीनामुत्पत्तिकारणम् । मूलं मूलेन क्रयविक्रयार्थमिदं दघे कादिति यः । इति भरतः ॥ दर इति दाम इति च भाषा । तत्पर्य्यायः । वस्नः २ अवक्रयः ३ । इत्यमरः । २ । १० । ३९ ॥ ( यथा, मनौ । ८ । ३२२ ।
"पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥" )
मूल्यते अर्प्यते इदम् । माहिना इति भाड़ा इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्व्वेशः १० पणः ११ । इति च अमरः । २ । १० । ३८ ॥ ( यथा, मिताक्षरायाम् ।
"मूल्येन यः कर्म्म करोति स भृतकः ।")

मूल्यं, त्रि, ( मूलं रोपणमर्हतीति । मूल+यत् ।) प्रतिष्ठायोग्यः । रोपणयोग्यः । इति मूलधात्वर्थदर्शनात् ॥ ( मूलत उत्पाट्यते इति । "मूलमस्याबर्हि ।" ४ । ४ । ८८ । इति यत् । मूलतउत्पाटनयोग्ये सुश्रुतादौ ॥ )

मूष मुष्कने । इति कविकल्पद्रुमः ॥ ( भ्वा॰-पर॰-सक॰-सेट् ।) तस्करी । यो मूषति परद्रव्यम् । इति हलायुधः ॥ ह्रस्वोक्ते । मोषति । इति दुर्गादासः ॥

मूषः, पुं-स्त्री, ( मोषति अपहरतीति । मुष्+इगुपधत्वात् कः । ) मूषिकः ॥ ( यथा, पञ्चतन्त्रे । ३ । २२२ । "एष प्रतिभाति ते मूषराजः ।") तैजसावर्त्तनी । इति शब्दरत्नावली ॥

मूषकः, पुं-स्त्री, ( मूष+स्वार्थे कन् । ) उन्दुरः । इति शब्दरत्नावली ॥ ( यथा, रामायणे । २ । ३३ । १९ ।
"रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः ।
मूषकैः परिधावद्भिरुद्भिलैरावृतानि च ॥" )